अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [खण्ड—क (20) + खण्ड—ख (4+4)] एवं 10 पृष्ठाः सन्ति।

Roll No.
अनुक्रमांक

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

**Code No.** **50/SS/A/S**
कोड नं०

**Set/सेट** **A**

# संस्कृतम्

## (309)

Day and Date of Examination ..........................................................................

Signature of Invigilators 1. ........................................................

2. ........................................................

---

*निर्देशाः —*

1. परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व-अनुक्रमाङ्कम् अवश्यं लिखतु।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम्।
3. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
4. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कोड संख्या 50/SS/A/S, सेट A अवश्यमेव लेखनीया।

# संस्कृतम्

# (309)

समयः —होरात्रयम् ]  [ पूर्णाङ्काः —100

**निर्देशाः —** (i) अस्मिन् प्रश्नपत्रे **द्वौ** खण्डौ स्तः। खण्ड—क (केन्द्रिकः पाठ्यक्रमः), खण्ड—ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः।

(ii) खण्ड—क अनिवार्यः। अस्मिन् खण्डे 20 प्रश्नाः सन्ति।

(iii) खण्ड—ख **एकः** एव वैकल्पिकः समाधेयः।

(iv) खण्ड—क कृते *85* अङ्काः, खण्ड—ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः। अस्य कृते *15* अङ्काः निर्धारिताः।

## खण्ड—क

## केन्द्रिकः पाठ्यक्रमः

**1.** अधोलिखितेषु कस्यचि**देकस्य** पाठस्य सारं षड्वाक्येषु लिखत— 6

(क) एतद् उपास्यम्

(ख) अतिलोभः न कर्त्तव्यः

(ग) राजते खलु कन्याकुमारी

**2.** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत— 1×4=4

अत्र विशिष्टं ध्यानमन्दिरम् अस्ति। स्मारकस्य अंधकारमये प्रकोष्ठे पुरतः ‘ॐ’ इत्यस्य चित्रं दृश्यते। अत्र सर्वे मौनं तिष्ठन्ति। शिलास्मारकस्य विशाले परिसरे देश-विदेशेभ्यः पर्यटकाः आगत्य अस्य सुंदरतां पश्यन्ति साधनां च कुर्वन्ति।

**प्रश्नाः**

(क) विशिष्टं ध्यानमन्दिरं कुत्र अस्ति?

(ख) अंधकारमये प्रकोष्ठे कस्य चित्रं पुरतः दृश्यते?

(ग) प्रकोष्ठे सर्वे कथं तिष्ठन्ति?

(घ) पर्यटकाः तत्र आगत्य किं कुर्वन्ति?

**3.** अधोलिखितानां प्रश्नानाम् उचितमुत्तरं चित्वा लिखत— 1×4=4

(क) बाणासुरः कस्य पुत्रः आसीत्? (प्रजापतेः / शिवस्य)

(ख) भरतेन दक्षिणदेशः कस्मै दत्तः? (बाणासुराय / कुमार्यै)

(ग) कन्याकुमार्या कः हतः? (बाणासुरः / विवेकानन्दः)

(घ) कन्याकुमारीक्षेत्रे कति समुद्राणां संगमः अस्ति? (चतुर्णाम् / त्रयाणाम्)

**4.** (क) रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत— 1×2=2

*(i)* कस्मिंश्चित् ग्रामे चत्वारि मित्राणि अवसन्।

*(ii)* ते तस्य मठम् अगच्छन्।

(ख) प्रश्नान् उत्तरत— 1×2=2

*(i)* जीवकः कस्य शल्यक्रियाम् अकरोत्?

*(ii)* कस्य सेवनेन जरारहित देहप्राप्तिः भवति?

**5.** एतत् कथनं कः कं प्रति कथयति? 2

(क) सखि, संहर रोषम्, असंस्कृतमतयोऽपि मुनयः माननीयाः।

(ख) उपाध्याय, स्खलितमेकं क्षमस्व।

**6.** अधोलिखितपद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत— 2×2=4

(क) अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य, स्थितः पृथिव्या इव मानदण्डः।।

**प्रश्नद्वयम्—**

*(i)* हिमालयः कस्यां दिशि स्थितः अस्ति?

*(ii)* हिमालयः किमिव स्थितः?

(ख) दूषितं परदोषैर्हि गृह्णीते योऽन्यथाशुचिम्।
स्वयं संदूषितामात्यः क्षिप्रमेव विनश्यति॥

**प्रश्नद्वयम्—**

*(i)* शुचिं जनं राजा किमर्थं दण्डयति?

*(ii)* कीदृशः राजा क्षिप्रमेव विनश्यति?

**7.** अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत— 2

(क) अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत्।
जयेत् कदर्यं दानेन जयेत् सत्येन नानृतम्॥

अन्वयः —

क्रोधम् अक्रोधेन ———, असाधुं साधुना जयेत्, कदर्यं ——— जयेत्, अनृतं च सत्येन जयेत्।

(ख) अपूर्वोऽयं मया दृष्टः कान्तः कमललोचने।
शोऽन्तरं यो विजानाति स विद्वान्नात्र संशयः॥

अन्वयः —

कमललोचने, मया अयम् अपूर्वः ——— दृष्टः। यः शोऽन्तरं यो ——— सः विद्वान्, नात्र संशयः।

**8.** अधोलिखितपद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत— 2

(क) जयेत् सत्येन चानृतम्।

भावार्थः —

असत्यं सत्येन ———।

(ख) किं सम्पाद्यं मनुजैर्विद्या वित्तं बलं यशः।

भावार्थः —

मनुजैः विद्या, वित्तम्, बलम् यशः च ———।

**9.** पद्यांशं 'अ' स्तम्भात् 'ब' स्तम्भेन सह मेलयत— 2

| **स्तम्भ—अ** | | **स्तम्भ—ब** | |
|---|---|---|---|
| *(i)* | कस्मै स्पृह्यति कमला | (क) | उभयं नाशयेदिदम् |
| *(ii)* | कस्तूरी जायते कस्मात् | (ख) | त्वनलसचित्ताय नीतिवृत्ताय |
| *(iii)* | अपूजितं तु तद् भुक्तम् | (ग) | मृगात् सिंह-पलायनम् |
| *(iv)* | कुतस्तद्धनलुब्धानाम् | (घ) | इतश्चेतश्च धावताम् |

**10.** 'काले फलति सौभाग्यम्' इति नाटकस्य सारांशं षड्वाक्येषु लिखत। सहायतायै बिन्दवः दत्ताः — 6

**बिन्दवः**

लब्धदत्तः, निर्धनः, राज्ञः, कृतवान्, राजा, बीजपूरफलं, उदरपूरणाय, एकेन रूप्यकेण, राजा, परीक्षितुं, साधुं, नर्तकीं, व्यापारिणम्, सर्वे, अयच्छत्, राज्ञे, अन्ते, प्रदर्श्य, रत्नानि, यच्छति।

**11.** (क) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत— 1×2=2

गोपालकः : (ब्राह्मणवेशान् यक्षान् विलोक्य) स्वागतम्, अत्र भवताम्। कुतः समायाताः भवन्तः?

यक्षाः : अरण्यदर्शनोत्सुकाः वयम् इहागताः स्मः। परं त्वम् एकाकी विचरन्, वंशीं च वादयन् भीतिं न अनुभवसि।

गोपालकः : कुतो भीतिः? भगवति बोधिसत्त्वे मैत्रीबले राज्यं शासति सर्वाः प्रजाः निर्भयाः सन्ति। कश्चित् कमपि पीडयितुं न प्रभवति।

यक्षाः : किं राक्षसाः अपि?

गोपालकः : अथ किम्। यदि कौतूहलं, श्रूयताम्।

**प्रश्नाः**

*(i)* यक्षाः वने किमर्थं गताः?

*(ii)* कस्मिन् शासति सर्वाः प्रजाः निर्भयाः सन्ति?

(ख) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत— 1×2=2

मैत्रबलः : किम् अतिथयः। भोजनेच्छया बहिः तिष्ठन्ति, सादरं प्रवेशय। (राजसभां प्रविश्य)

एकः ब्राह्मणः : महाराजो विजयताम्, दूरात् संप्राप्ताः वयं क्षुधया पिपासया च पीडिताः स्मः। युष्माकं गुणगणख्यातिम् औदार्यं च निशम्य इह समागताः।

**प्रश्नाः**

*(i)* अतिथयः कया इच्छया बहिः तिष्ठन्ति?

*(ii)* ब्राह्मणाः किं निशम्य तत्र समागताः?

**12.** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त-प्रश्नान् उत्तरत—

(क) **गद्यांशः**

क्षमा हि मूलं सर्वतपसाम्। परदोषदर्शनदक्षा दृष्टिरिव कुपिता बुद्धिः। न ते आत्मदोषं पश्यति। अतिरोषणश्चक्षुष्मानन्धः एव जनः। न हि कोपकलुषिता विमृशति मतिः कर्त्तव्यम् अकर्त्तव्यं वा।

**प्रश्नाः**

*(i)* सर्वतपसां मूलं किम्? 1

*(ii)* कीदृशी बुद्धिः आत्मदोषं न पश्यति? 2

*(iii)* कीदृशः जनः अन्धः एव? 2

(ख) **पद्यांशः**

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन।।

**प्रश्नाः**

*(i)* 'सतां गेहे' इत्यस्य कः अर्थः? 1

*(ii)* सत्पुरुषाः अतिथीनां सम्मानं केन वचसा कुर्वन्ति? 2

*(iii)* सतां गेहे कानि वस्तूनि न उच्छिद्यन्ते? 2

**13.** मञ्जूषापदसहायतया 'मम विद्यालयः' इति विषयमधिकृत्य दशवाक्यानि लिखत। 1×10=10

**मञ्जूषा**

नाम, नगरस्य सर्वश्रेष्ठः, द्विसहस्र संख्याकाः छात्राः, पञ्चाशत् अध्यापकाः, विभिन्नेषु विषयेषु निष्णाताः, योग्यः, अनुशासनप्रियः प्राचार्यः, क्रीडाक्षेत्रम् विशालम्, हरितम् उद्यानम्, तरणतालः, पुस्तकालये विंशति सहस्र पुस्तकानि, उत्तमं परीक्षाफलम्।

**14.** भवान् राजकुमारः। भवतां निवासक्षेत्रे जलापूर्तिः यदा-कदा बाधिता भवति। तदर्थं जलपरिषदं प्रति पत्रं लिखतु। 6

**15.** भवतः नाम सुधांशुः। श्वः भवतः जन्मोत्सवः अस्ति। अतः तमुपलक्ष्य स्वमित्राय दिनेशाय दूरभाषसंवादं लिखत। चत्वारि वाक्यानि लिखत। 1×4=4

**16.** रेखाङ्कितपदे सन्धिच्छेदं कुरुत— 1

(क) किं चानर्घं, यदवसरे दत्तम्।

(ख) वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्विधम्।

**17.** (क) रेखाङ्कितपदे का विभक्तिः किं च मूलपदम्? 2

कस्य वशे जगदेतत्?

(ख) रेखाङ्कितपदद्वयं लट्लकारे परिवर्त्य लिखत— 2

पूर्वं भरतः नाम नृपः अभवत्।

तस्य अष्ट पुत्राः आसन्।

**18.** समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत— 1×4=4

(क) सः बहुमूल्यं वस्त्रं ——— सभायाम् आगच्छति। (आ + दा + ल्यप्)

(ख) किं ———, मम भाग्यम् एव विपरीतम्। (कृ धातु + उचित-रूप)

(ग) निर्धनः जनः धैर्यम् ——— धनवान् भवति। (अव + लम्ब् + ल्यप्)

(घ) वृक्षाः लोकाय फलं ——— उपकारं कुर्वन्ति। (प्र + दा + ल्यप्)

**19.** यथानिर्दिष्टं कुरुत— 1×4=4

(क) एष महाराजः तिष्ठति। (रेखाङ्कितपदस्य विग्रहं कुरुत)

(ख) कस्मै प्रदीयते भवता? (उपसर्गं चिनुत)

(ग) तेन जीवहिंसा त्यज्यते। (कर्तृवाच्ये परिवर्तनं कुरुत)

(घ) दामोदरबलरामौ गच्छतः। (समस्तपदं चिनुत)

**20.** अधोलिखितवाक्यद्वये **एकम्** अव्ययम् **एकम्** उपसर्गं च चित्वा लिखत— 2

(क) दामोदरः बलरामेण सह गच्छतु।

(ख) जनकः पुत्रं सस्नेहं पश्यति।

## वैकल्पिक–I

### ( संस्कृतं संस्कृतिश्च )

**21.** अधोलिखितकाव्यानां तेषां लेखकैः सह मेलनं कृत्वा लिखत— 2

| | अ | | ब |
|---|---|---|---|
| *(i)* | जवाहरज्योतिमहाकाव्यम् | (क) | जी० बी० पल्सुले |
| *(ii)* | उत्तरसीताचरितम् | (ख) | रेवाप्रसाद द्विवेदी |
| *(iii)* | शर्मण्यदेशः सुतरां विभाति | (ग) | सत्यव्रत शास्त्री |
| *(iv)* | करुणाकटाक्षलहरी | (घ) | रसिकबिहारी जोशी |

**22.** अधोलिखितप्रश्नान् उत्तरत—

(क) अधोलिखित-संख्यानां कृते संस्कृतपदानि लिखत— 2

$10^{11}$, $10^{12}$, $10^{9}$, $10^{8}$

(ख) 'आर्यभटीयम्' इति कस्य ग्रंथमस्ति? लेखकस्य कस्मिन् क्षेत्रे महत्त्वपूर्णं योगदानम्? 2

(ग) 'यजुर्वेद'स्य कस्यां संहितायां संख्यानां नामसूची वर्तते? 1

(घ) 'चरकसंहिता'यां प्रमुखतया कस्य वर्णनं कृतम्? ग्रंथे कति अध्यायाः सन्ति? 2

**23.** द्रविडभाषापरिवारे काः भाषाः सन्ति? 2

**24.** (क) वर्णाः के? तेषां नामानि लिखत। 1

(ख) 'संस्कारः' इति शब्दस्य कः अर्थः? 2

(ग) कर्णवेध-संस्कारः कदा क्रियते? 1

## वैकल्पिक–II

## ( प्रयोजनमूलकसंस्कृतम् )

**21.** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत— 1×4=4

(क) आर्यभट्टेन त्रिभुजस्य ——— उपवर्णितम्।

(ख) अद्य प्राच्यविज्ञानस्य ——— सह समन्वयस्य आवश्यकता अस्ति।

(ग) ब्रह्मगुप्तः ——— नियमान् निर्मितवान्।

(घ) बी० ए० एम० एस० पाठ्यक्रमे ——— ज्ञानम् अनिवार्यतया अपेक्षते।

**22.** अधोलिखितप्रश्नान् उत्तरत— 1×4=4

(क) दूरदर्शने संस्कृतवार्त्तानां दैनिकं प्रसारणं कस्मिन् वर्षे आरब्धम्?

(ख) जनसञ्चारस्य वार्त्तानां स्रोतांसि कतिविधानि भवन्ति?

(ग) 'डी० डी० ज्ञानदर्शनम्' इति प्रणालिकाः प्रतिसप्ताहं कतिदिनेषु संस्कृतकार्यक्रमं प्रसारयति?

(घ) आकाशवाणीभवने वार्त्ताकक्षे संपादकाः किं कुर्वन्ति?

**23.** 'अर्वाचीनसंस्कृतम्' इति पत्रिका कुतः प्रकाश्यते? तस्या प्रकाशनसंस्थायाः नाम किम्? 1+1=2

**24.** (क) अद्यत्वे संस्कृतपत्रकारिता कया दृष्ट्या महत्त्वपूर्णा अस्ति? 1

(ख) 'नवप्रभातम्' इति दैनिकसमाचारपत्रं कुतः प्रकाश्यते? 1

(ग) पत्रपत्रिकासु चित्राणाम् उचितम् संयोजनस्य आधारः किं भवति? 1

(घ) '।' इति चिह्नं कस्य कृते प्रयुज्यते? 2

★ ★ ★